स्थूला निहन्ति चैवायुः सूक्ष्मा स्वल्पमतिं हरेत् ।
पूजाफलं लाञ्छितया निष्फलं लाञ्छनं विना ।
कपिला चित्तवैकल्यं नेत्ररोगञ्च कर्वुरा ॥
भग्ना भङ्गकरी ज्ञेया बहुचक्रापमानताम् ।
लक्षणान्तरहीना च देवचक्रा वियोगताम् ॥
वृहन्मुखी कलत्रघ्नी वृहच्चक्रा सुतान् हरेत् ।
संलग्नचक्रा त्वसुखं बद्धचक्रा महागदम् ॥
भग्नचक्रा तु दारिद्रं सर्वनाशं त्वधोमुखी ।
कुष्ठादिकं व्यालमुखी विषमा विविधापदम् ॥
विकृतावर्त्तनाभिश्च विकारान् कुरुते बहून् ।
वंशच्छेदो गृहस्थानां नारसिंह्यां प्रजायते ॥
रेखार्त्ता दुःखदात्री च यथा सूक्ष्मा तथा सुखम् ।
यथा स्निग्धास्तथा लक्ष्मीस्तद्विभेदादतः शृणु ॥
लक्ष्मीहरिः स विज्ञेयो यत्र पद्मं सचक्रकम् ।
केवला वनमाला वा गृहस्थानामभीष्टदः ॥१॥
वासुदेवः स विज्ञेयो यद्द्वारं चक्रयुग्मकम् ।
निरन्तरं समं वापि स श्वेतः पापनाशनः ॥२॥
सङ्कर्षणः स विज्ञेयः प्राक् पश्चाच्चक्रयुग्मकम् ।
संलग्नपूर्वभागश्च महद्रक्तः सुशोभनः ॥ ३ ॥
प्रद्युम्नः सूक्ष्मचक्रः स्याच्छिद्रं दीर्घं विचित्रितम्
सुषिरास्सर्वच्छिद्रं पीत इष्ट प्रदायकः ॥४॥
अनिरुद्धस्तु नीलाभो वर्त्तुलश्चातिशोभनः ।
रेखाद्वयन्तु तद्द्वारि पृष्ठं पद्मेन लाञ्छितम् ॥५॥
केशवः स तु विज्ञेयस्त्वेकं वा द्वयमेव वा ।
प्राग्वा पश्चाच्च चक्रं स्यात् चतुष्कोणः स भाग्यकृत् ॥ ६ ॥
नारायणः श्यामवर्णः नाभौ चक्रं तथोन्नतम् ।
दीर्घरेखासमायुक्तं दक्षिणे शुषिरं पृथु ॥ ७ ॥
हरिरूपा शिला सा स्यादयस्या ऊर्द्धं मुखं भवेत् ।
हरिवद्दृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा ॥८॥
परमेष्ठी स विज्ञेयः पद्मचक्रान्वितस्तु यः ।
विल्वाकृतिश्च शुक्राभः पृष्ठे च शुषिरं महत् ॥९॥
विष्णुस्तु कृष्णवर्णः स्यात् स्थूलचक्रे सुशोभने ।
द्वारोर्ध्वे तथा रेखा दृश्यते मध्यदेशतः ॥१०॥
नारसिंहस्तु कपिलः पृथुचक्रो बृहन्मुखः ।
त्रयो वा पञ्च वा तत्र बिन्दवो गृहिणां न सत् ॥११॥
कपिलो नरसिंहस्तु गुडलाक्षानिभो भवेत् ।
स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना ॥१२॥
महानृसिंहो विज्ञेयः पूर्वोक्तैर्लक्षणैर्युतः ।
रेखाश्च केशराकारा मुखं दीर्घं भयानकम् ॥१३
लक्ष्मीनृसिंहो विज्ञेयश्चतुश्चक्रः सबिन्दुकः ।
पूर्वोक्तलक्षणैर्युक्तो वनमालाविराजितः ॥१४॥
वराहोऽसौ शक्तिलिङ्गे चक्रे च विषमे तथा ।
इन्द्रनीलनिभः स्थूलस्त्रिरेखालाञ्छितो भवेत्१५
पृथ्वीवराहनाम्नी सा या वराहाकृतिः शिला,
आभुग्ना चैव रेखैका गतराज्यप्रदायिका ॥१६॥
मत्स्याख्या सा शिला ज्ञेया बिन्दुत्रयविभूषिता
कांस्याङ्गारा स्वर्णनिभा दीर्घा सा भुक्तिमुक्तिदा ॥१७॥

कूर्माख्या तु शिला पृष्ठे वर्त्तुला चोन्नता भवेत्
हरितं वर्णमाधत्ते कौस्तुभेन च चिह्निता ॥
शिलाकूर्मः स विज्ञेयः कूर्माकारस्तु यो भवेत्
चक्राङ्किता तथा हन्ता पूजिता सा पदप्रदा ॥१८
हयग्रीवोऽङ्कुशाकारा रेखा चक्रा समीपगा ।
बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलकम् ॥१९॥
ज्ञेयः सौम्यहयग्रीवो हयग्रीवासमा शिला ।
दीर्घया लेखया युक्ता रेखा वा तादृशी भवेत् ॥२०॥
हयशीर्षः स विज्ञेयो मुखं यस्य हयाकृति ।
पद्माकृति भवेद्वापि साक्षमालं शिरस्तथा ॥२१॥
वैकुण्ठस्तिलवर्णाभश्चक्रमेकं तथा ध्वजम् ।
द्वारोपरि तथा रेखा पूज्याकारा सुशोभना ॥२२
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया ।
कदम्बकुसुमाकाररेखापञ्चकभूषितः ॥२३॥
वामनः स तु विज्ञेयो योऽतिह्रस्वश्च वर्त्तुलः ।
अतसीकुसुमप्रख्यो बिन्दुना परिशोभितः ॥२४॥
दधिवामननामा तु ऊर्द्धाधश्चक्रसंयुतः ।
महाद्युतिरतिह्रस्वः शुभश्च क्षेमदायकः ॥२५॥
सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः ।
वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे ॥२६॥
सहस्रार्ज्जुननामासौ नानारेखामयो भवेत् ।
चक्राकारा यन्त्रपङ्क्तिः स नष्टद्रव्यदायकः ॥२७
स्थूलो दामोदरो यस्य मध्ये चक्रं प्रतिष्ठितम्
दूर्वाभं द्वारसङ्कीर्णः पीतरेखा धनप्रदः ॥२८॥
राधादामोदरो ज्ञेय ऊर्द्धाधश्चक्रवद्विलम् ।
नातिदीर्घं सुरे मध्ये लम्बरेखा स भोगदः ॥२९
दामोदरः स विज्ञेयो यश्चक्रद्वयलाञ्छितः ।
सूक्ष्मं भवेच्च विवरं पूजितः सुखदः सदा ॥३०॥
अनन्तो बहुवर्णः स्यान्नागभोगेन चिह्नितः ।
अनेकचक्रसंभिन्नः सर्वकामफलप्रदः ॥३१॥
पुरुषोत्तमनामासौ यस्य दिक्षु विदिक्षु च ।
ऊर्द्धान्यास्यानि दृश्यन्ते पुरुषार्थफलप्रदः ॥३२॥
योगेश्वरः स विज्ञेयो लिङ्गं यस्य शिरोगतम् ।
ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः ॥३३॥
पद्मनाभस्तथा रक्तः पङ्कजच्छत्रसंयुतः ।
तुलस्या पूजितो नित्यं दरिद्रस्त्वीश्वरो भवेत्३४
रश्मिज्वालो हिरण्याक्षयन्त्राभः स्फटिकोपमः ।
अथवा जायते नानास्वर्णरेखाभिरन्वितः ॥३५॥
गरुडः स तु विज्ञेयो मध्ये पक्षद्वयान्विते ।
सुदीर्घा दृश्यते रेखा स सर्पविषनाशकः ॥३६॥
जनार्द्दनः स विज्ञेयः केवलानि स्फुटानि च ।
यस्योदरे तु चक्राणि चत्वारि पिठद्वमिकृत् ॥३७
लक्ष्मीनारायणो ज्ञेयो वनमालाङ्कितोदरः ।
सूक्ष्मद्वारश्चतुश्चक्रो भुक्तिमुक्तिप्रदायकः ॥३८॥
हृषीकेशः स विज्ञेयो योऽर्द्धचन्द्राकृतिर्भवेत् ।
तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च समीहितान् ॥ ३९ ॥
लक्ष्मीनरहरिर्ज्ञेयः कृष्णवर्णः सबिन्दुकः ।
वामपार्श्वे समे चक्रे गृहस्थाभीष्टदायकः ॥४०॥
त्रिविक्रमस्तु विज्ञेयः श्यामवर्णो महाद्युतिः ।

वामपार्श्वे चक्रयुग्ममेकरेखा तु दक्षिणे ॥४१॥
कृष्णो ज्ञेयः शिला कृष्णा सचक्रा वा विचक्रिका ।
प्रदक्षिणावर्त्तकृतवनमालाविभूषिता ॥ ४२ ॥
चतुर्म्मुखः स विज्ञेयो द्वे चक्रे मध्यदेशतः ।
चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रदः ॥४३॥
विष्णोर्भेदा इमे प्रोक्ता अत्रैवावाहयेद्धरिम् ।
विसर्ज्जयेच्च पूजान्ते प्रतिष्ठां नात्र कारयेत् ॥*॥
शालग्रामाः समाः पूज्या समेषु द्वितयं न हि ।
असमा नैव पूज्यन्ते एकः पूज्यतमो मतः ॥
शिला द्वादश यो नित्यं भक्त्या संपूजयेन्नरः ।
दिने दिने धर्म्मवृद्धिः पापनाशश्च जायते ॥
शालग्रामशिलां यस्तु भक्त्या संपूजयेन्नरः ।
शतं दिनानि यस्तेन कृतः कामः स सिध्यति ॥*
शालग्रामा मत्स्वरूपाः शृणु तेषान्तु लक्षणम्
यत्सेवनाद्भवेदिष्टमिह लोके परत्र च ॥
शिवनाभः स विज्ञेयः सलिङ्गाकारताङ्गतः ।
स्वयम्भुलिङ्गाकृतिमान् मन्त्रसिद्धिविधायकः ॥१
त्र्यम्बकः स तु विज्ञेयो यो बिन्दुत्रयभूषितः ।
शूलाकारा तथा रेखा शतपुंस्त्वप्रदायकः ॥२॥
धूर्ज्जटिः स तु विज्ञेयो यत्र रेखा जटासमा ।
तिस्रो यत्र प्रदृश्यन्ते सोऽर्च्चितो ज्ञानदायकः३
शम्भुस्तु पाण्डरो ज्ञेयो बिन्दुकृष्णस्तु मस्तके ।
विल्वप्रमाणस्तेजस्वी पूजितः स्त्रीवशङ्करः ॥४॥
ईश्वरः स तु विज्ञेयो रक्तो बिन्दुस्तु मस्तके ।
एकचक्रो द्विचक्रो वाभ्यन्तरेऽधश्च गोपदम् ॥५॥
मृत्युञ्जयः स विज्ञेयः स्वल्पमृत्युविनाशकः ।
अधश्चक्रं तदूर्द्धञ्च श्वेता रेखा त्रिशूलवान् ॥६॥
चन्द्रशेखरनामासावर्द्धचन्द्राकृतिस्तु के ।
मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम् ॥ ७ ॥
रुद्रः स एव विज्ञेयः कपिलो मूर्त्ति रञ्जितः ।
चक्रमध्ये भवेद्रेखा मारयेद्रिपुसन्ततिम् ॥८॥*॥
शालग्रामानथो वक्ष्ये शक्तिकीटसमुद्भवान् ।
येषां पूजनतो देवी भवानी सुप्रसीदति ॥
योनिर्या सा तले चक्रमूर्द्ध्वे कृत्वं प्रदृश्यते ।
वाह्ये घण्टाङ्कितो मूर्द्धा स्निग्धा श्यामाखिलेष्टदा ॥ १ ॥
महाकाली तु सा ज्ञेया योनिचिह्नसमन्विता ॥२
हिच्छिद्राद्या सर्वशिला त्रिकोणेनाङ्किता च या
यदायुधाकृतिश्चोर्द्ध्वं तां देवीं तत्र निर्द्दिशेत् ॥
देवीशिला सचक्रा या दक्षमार्गेण तां यजेत् ।
सार्च्चिता वाममार्गेण लोकद्वयसुखावहा ॥
या चक्ररहिता देवी शिला तां वामतोऽर्च्चयेत् ।
सर्गकार्य्येण विप्राणां नगभां चोभकृद्भवेत् ॥*॥
सौरिशिला दुर्लभैव प्रायः कलियुगे सुराः ।
स्फटिकाभा भवेत् सा तु धर्म्मयुक्ता विमुक्तति ॥
तुलस्योर्द्ध्वस्थिते वह्निं साभिसिक्ता प्रवर्षणम् ।
कुरुते शपथे मिथ्या कृते स्यात् कुष्टकारिका ॥*
गणेशः स तु विज्ञेयः स्वल्पशुण्डाङ्कितो भवेत् ।
शुण्डाकारा शिला वापि गजाननसमापि वा ॥*
यस्या मध्ये महच्चक्रं सूक्ष्मचक्रञ्च यद्दिशि ।